| अथालङ्कारनामानि | तल्लक्षणानि | तदुदाहरणानि |
|---|---|---|
| अल्पं ——— १८ | "अल्पन्तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता" । १८ | "मणिमालोर्म्मिका तेऽद्य करे जपवटायते" ॥ १८ |
| अवज्ञालङ्कृतिः ——— १९ | "ताभ्यां तौ यदि न स्यातामवज्ञालङ्कृतिस्तु सा"। १९ | "स्वल्पमेवाम्बु लभते पाथ्यः प्राप्यापि सागरं ।<br>मीलन्ति यदि पद्मानि का हानिरमृतद्युतेः" ॥ १९ |
| असङ्गतिः ——— २०<br>तस्य त्रीणि लक्षणानि । | "विरुद्धभिन्नदेशत्वं कार्य्यहेत्वोरसङ्गतिः ।<br>अन्यत्र करणीयस्य ततोऽन्यत्र कृतिश्च सा ॥<br>अन्यत् कर्त्तुं प्रवृत्तस्य तद्विरुद्धकृतिश्च सा" । २० | "विषं जलधरैः पीतं मूर्च्छिता पथिकाङ्गना ।<br>अपारिजातां वसुधां चिकीर्षन् द्यां तथाकृथाः ।<br>गोत्रोद्धारप्रवृत्तो हि गोत्रोद्धारं पुराकरोः" ॥ २० |
| असदर्थनिदर्शना ——— २१ | "अपरां बोधनं प्राहुः क्रिययासत्सदर्थयोः"।अस्यार्थः।<br>कस्यचित् किञ्चित् क्रियाविशिष्टस्य स्वक्रियया-<br>परान् प्रति असतः सतो वार्थस्य बोधनंवर्णनं।२१ | "नश्येद्राजविरोधीति क्षीणं चन्द्रोदये पुनः" ॥ २१ |
| असम्भवः ——— २२ | "असम्भवोऽर्थनिष्पत्तेरसम्भाव्यत्ववर्णनं" । २२ | "को वेद गोपशिशुकः शैलमुत्पाटयिष्यति" ॥ २२ |
| आवृत्तिदीपकं ——— २३<br>तत् त्रिविधं । पदावृत्तिः । अर्थावृत्तिः । उभया-<br>वृत्तिः । | "त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकं" । २३ | "वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्व्वरी॥<br>उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः ।<br>माद्यन्ति चातकास्तृप्ता माद्यन्ति च शिखावलाः"॥ २३ |
| आक्षेपः ——— २४<br>अस्य त्रीणि लक्षणानि लक्ष्याणि च । | "आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात् ।<br>निषेधाभास आक्षेपं बुधाः केचन मन्वते ॥<br>आक्षेपोऽन्यो विधौ व्यक्ते निषेधे च तिरोहिते"।२४ | "चन्द्र सन्दर्शयात्मानमथवास्ति प्रियामुखं ।<br>नायं दूति तनोस्तापस्तस्याः कालानलोपमः ।<br>गच्छ गच्छसि चेत्कान्त तत्रैव स्याज्जनिर्म्मम"॥ २४ |
| उत्प्रेक्षा ——— २५<br>सा वस्तुहेतुफलात्मतागोचरत्वेन त्रिविधा वस्तूत्प्रेक्षा। हेतूत्प्रेक्षा। फलोत्प्रेक्षा। तत्राद्या उक्तविषया अनुक्तविषया चेति द्विविधा। परे हेतुफलोत्प्रेक्षे सिद्धासिद्धविषयतया प्रत्येकं द्वि-विधे। एवमुत्प्रेक्षा षड्विधा। | "सम्भावनाः स्युरुत्प्रेक्षा वस्तुहेतुफलात्मता ।<br>उक्तानुक्तास्पदाद्यात्र सिद्धासिद्धास्पदे परे" । २५ | "धूमस्तोमं तमः शङ्के कोकीविरहशालिनां ।<br>लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ॥<br>रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद्ध्रुवं ।<br>त्वन्मुखाभेच्छया नूनं पद्मैर्व्वैरायते शशी ॥<br>मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः ।<br>प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति" ॥ २५ |
| उत्तरं ——— २६ | "किञ्चिदाकूतसहितं स्याद्गूढ़ोत्तरमुत्तरं" । २६ | "यत्रासौ वेतसी पान्थ तत्रेयं सुतरां सरित्" ॥ २६ |
| उदात्तं ——— २७ | "उदात्तमृद्धिरचितं श्लाघ्यमाल्योपलक्षणं" । २७ | "सासौ यत्राभवद्युद्धं तव धूर्ज्जटिनाऽर्ज्जुन" ॥ २७ |
| उपमा ——— २८ | "उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः" । २८ | "हंसीव भूपतेः कीर्त्तिः स्वर्गंदीमवगाहते" ॥ २८ |
| उपमेयोपमा ——— २९ | "पर्य्यायेण द्वयोस्तच्चेदुपमेयोपमा मता" । २९ | "धर्म्मोऽर्थ इव पूर्णश्रीरर्थो धर्म्म इव त्वयि" ॥ २९ |
| उल्लासः ——— ३० | "एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्य तौ यदि" । ३० | "अपि मां पावयेत् साध्वी स्नात्वेतीच्छति जाह्नवी ॥<br>काठिन्यं कुचयोर्दृष्टं वाञ्छन्त्यः पादपद्मयोः ।<br>निन्दन्ति विश्वधातारं त्वद्धाटीश्वरियोषितः ॥<br>तदभाग्यं धनस्यैव यन्नाश्रयति सज्जनं ॥<br>लाभोऽयमेव भूपाल सेवकानां न चेद्वधः" ॥ ३० |
| उल्लेखः ——— ३१<br>लक्षणभेदेन स द्विविधः । | "बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते ।<br>एकोनबहुधोल्लेखोऽप्यसौ विषयभेदतः" । ३१ | "स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः ।<br>गुरुर्वचस्यर्जुनोऽयं कीर्त्तौ भीष्मः शरासने" ॥ ३१ |
| एकावली ——— ३२ | "गृहीतमुक्तरीत्यार्थश्रेणीरेकावली मता" । ३२ | "नेत्रे कर्णान्तविश्रान्ते कर्णौ दोःस्तम्भशासनौ ।<br>दोःस्तम्भौ जानुपर्य्यन्तप्रलम्बनमनोहरौ ।<br>जानुनी रत्नमुकुराकारे तस्य महीभुजः" ॥ ३२ |
| कारकदीपकं ——— ३३ | "क्रमिकैकगतानान्तु गुम्फः कारकदीपकं" । ३३ | "गच्छत्या गच्छति पुनः पान्थः पश्यति पृच्छति"<br>॥ ३३ |
| कारणमाला ——— ३४<br>सा पूर्व्वपूर्व्वपदार्थानां कारणत्ववर्णनेन एवमुत्त-<br>रोत्तरपदार्थानां कारणत्ववर्णनेन च द्विधा । | "गुम्फः कारणमाला स्याद्यथा प्रक्रान्तकारणैः"। ३४ | "नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यशः ॥<br>भवन्ति नरकाः पापाः पापं दारिद्र्यसम्भवं ।<br>दारिद्र्यमप्रदानेन तस्माद्दानपरो भव" ॥ ३४ |
| काव्यलिङ्गं ——— ३५ | "समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनं" । ३५ | "जितोऽसि मन्द कन्दर्प मच्चित्तेऽस्ति त्रिलोचनः"<br>॥ ३५ |
| काव्यार्थापत्तिः ——— ३६ | "कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते" । ३६ | "स जितस्त्वन्मुखेनेन्दुः का वार्त्ता सरसीरुहां" ॥ ३६ |
| कैतवापह्नुतिः ——— ३७ | "कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नवे पदैः" । ३७ | "निर्यान्ति स्मरनाराचा कान्तादृक्पातकैतवात्" ॥<br>३७ |
| गूढ़ोक्तिः ——— ३८ | "गूढ़ोक्तिरन्योद्देश्या गीर्यदन्यं प्रति कथ्यते" । ३८ | "वृषापेहि परक्षेत्रादायाति क्षेत्ररक्षकः" ॥ ३८ |
| चपलातिशयोक्तिः ——— ३९ | "चपलातिशयोक्तिस्तत्पौर्व्वापर्य्यव्यतिक्रमः" । ३९ | "अग्रे मानो गतः पश्चादनुनीता प्रियेण सा" ॥ ३९ |
| चित्रं ——— ४० | "पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते" । ४० | "मारमासुषमा चारुरुचा मारवधूत्तमा ।<br>मात्तधूर्त्ततमावासा सा वामा मेऽस्तु मारमा" ॥ ४० |